ऽकृताग्निसंस्कारे। "अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले ममेति" श्राद्धमन्त्रः। दग्धभिन्ने त्रि०।

**अदण्ड्य** त्रि० न दण्डमर्हति यत्। दण्डानर्हे "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्निति" याज्ञ०। "अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा नादण्ड्यो नाम राज्ञोऽस्ति धर्म्मात् प्रचलितः स्वकादिति" मनुः। स्मृत्यादौ कर्मविशेषे दण्डः तदभावश्च उक्तोऽनुसन्धेयः तत्र केचिददण्ड्याः संगृह्यन्ते। "अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा। सपालान् वा विपालान् न दण्ड्यान् मनुरब्रवीत्"। यानवाहकदण्डाभावे प्रयोजकमुक्तम् अतिवर्त्तनशब्दे, क्षेत्रे देयप्रावरणविशेषमुक्त्वा तदकरणे दण्डाभावो मनुनोक्तः यथा "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति" "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः पालोयेषाञ्च ते मोच्या दैवराजपरिप्लुता" इति "अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः। अदण्ड्याः काणकुण्ठाश्च वृषभः कृतलक्षण इति" स्मृतिः।

**अदत्ता** स्त्री दा-क्त न०त०। परिणयार्थमदत्तायां स्त्रियाम्। "अदत्तायां मृतायान्तु तद्गृहाच्छुध्यन्ति बान्धवा" इति स्मृतिः अदत्तमात्रे त्रि०। अप्राशस्त्ये न०त०। अदत्तन्तु भयक्रोधेत्याद्यभिहितलक्षणे दानाभासेनार्पिते दत्त्वापि प्रत्याहर्त्तुं योग्ये त्रि०। तच्चोक्तं नारदेन यथा "अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः। तथोत्कोच परीहासव्यत्यासच्छलयोगतः॥ बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदङ्कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्ये वा धर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति"। अस्यार्थः भयेन वन्दिग्राहादिभ्यो दत्तम्। क्रोधेन शत्रादिवैरनिर्य्यातनायान्यस्मै दत्तम्। पुत्त्रविहोनतादिनिमित्तशोकाविष्टेन दत्तम्। उत्कोचेन कार्य्यप्रतिबन्धनिराशार्थमधिकृतेभ्यो दत्तम्। परिहासेनोपहासेन दत्तम्। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यात्यासः। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोड़शवयस्केन मूढ़ेन, लोकवेदानभिज्ञेन अस्वतन्त्रेण पुत्त्रदासादिना, आर्त्तेन रोगाभिभूतेन, मत्तेन मदनीयप्रमत्तेन, उन्मत्तेन, वातिकाद्युन्मादग्रस्तेन वा अपवर्जितं दत्तम्। तथाऽयं मदीयमिदं कर्म्म करिष्यतीति प्रतिलाभेच्छया दत्तम्। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तम्। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि दत्तमदत्तमित्युच्यते प्रत्याहरणीयत्वात्। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम्। "स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात्। अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशय" इति कात्यायनस्मरणात्। तथेदमपरं संक्षिप्तार्थवचनं सर्वविवादसाधारणम्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यस्य वाप्युपधिं पश्येत् तत् सर्वं विनिवर्त्तयेत्" इति। योग उपाधिः। योगेनोपाधिविशेषेणाधिविक्रयदानप्रतिग्रहाः कृतास्तदुपाधिविगमे तान् विक्रयादीन् विनिवर्त्तयेदिति। यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति, यश्चादेयं प्रयच्छति, तयोर्दण्डो नारदेनोक्तः। "गृह्णात्यदत्तं यो लोभात् यश्चादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छक" इति। मिताक्षरा०।

**अदत्तादायिन्** त्रि० अदत्तमादत्ते आ+दा-णिनि ६त०। अदत्तस्य ग्राहके "अदत्तादायिनो हस्तात् लिप्सेत ब्राह्मणो धनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव स" इति स्मृतिः।

**अदत्र** त्रि० अद-बा० अत्रन्। अदनीये "अदत्रया दयते वार्य्याणीति" ऋ० ५, ४९, ३, अदत्रया, अदनीयानीति भा०।

**अदद्र्यञ्च्** त्रि० अमुमञ्चति अदस्+अन्च-क्विप् अद्र्यागमः। अदोगते, स्त्रियाम् अदद्रीची असर्वनामस्थानाद्यचि तु अदद्रीचः इत्यादि। अस्य दस्य वा मत्वोत्त्वे अमुद्र्यङ् अमुमुयङ् इत्यादयोऽप्यत्र।

**अदन्त** पु० नास्ति दन्तोऽस्य। पूषरूपे आदित्यभेदे वा कप् तत्रैव। "यद्यप्यदन्तकः पूषा पैष्टमत्ति सदा चरुमिति" छन्दोगप०। तस्यादन्तता च दक्षयज्ञभङ्गसमये वीरभद्रेण कृता यथा भागवते ४ स्कन्धे। "पूष्णो ह्यपातयद्दन्तान् कालिङ्गस्य यथा बलः। शप्यमाने गरिमणि योऽहसद्दर्शयन् दत" इति। अतएव तस्यादन्ततया पिष्टचरुभुक्त्वं तदपि तत्रैवोक्तम् प्रह्लप्रसादितेन शिवेन पश्चात् दक्षादिवरदानसमये "पूषा तु यजमानस्य दद्भिर्जक्षितु पिष्टभुगिति" श्रुतावपि "प्रपिष्टभागोऽदन्तको हि तं देवा अध्यगामिति" अदन्तकत्वेन पिष्टकभागित्वमुक्तम्। दन्तहीने, अजातदन्ते च त्रि०। "येऽप्यदन्ताः कुले ममेति" वायु०। नृणां दन्तजननकालस्तु षण्मास एव शुद्धितत्त्वे निर्णीतः पशूनान्तु "वर्षमात्रा तु बाला स्याद-